# Siddhi Lakshmi Stotram

# સિદ્ધિલક્ષ્મીસ્તોત્રમ્

## Document Information

Text title : Siddhi Lakshmi Stotra

File name : siddhilakShmIstotram.itx

Category : devii, lakShmI, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : shrIbrahmANDapurANe_IshvaraviShNusaMvAda

Latest update : January 15, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2024

*sanskritdocuments.org*

# સિદ્ધિલક્ષ્મીસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
ૐ અસ્ય શ્રીસિદ્ધિલક્ષ્મીસ્તોત્રસ્ય હિરણ્યગર્ભ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, સિદ્ધિલક્ષ્મીર્દેવતા, મમ સમસ્ત
દુઃખક્લેશપીડાદારિદ્ર્યવિનાશાર્થં
સર્વલક્ષ્મીપ્રસન્નકરણાર્થં
મહાકાલીમહાલક્ષ્મીમહાસરસ્વતીદેવતાપ્રીત્યર્થં ચ
સિદ્ધિલક્ષ્મીસ્તોત્રજપે વિનિયોગઃ ।
ૐ સિદ્ધિલક્ષ્મી અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં વિષ્ણુહૃદયે તર્જનીભ્યાં નમઃ ।
ૐ ક્લીં અમૃતાનન્દે મધ્યમાભ્યાં નમઃ ।
ૐ શ્રીં દૈત્યમાલિની અનામિકાભ્યાં નમઃ ।
ૐ તં તેજઃપ્રકાશિની કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રીં ક્લીં શ્રીં બ્રાહ્મી વૈષ્ણવી માહેશ્વરી
કરતલકરપૃષ્ઠાભ્યાં નમઃ । એવં હૃદયાદિન્યાસઃ ।
ૐ સિદ્ધિલક્ષ્મી હૃદયાય નમઃ ।
ૐ હ્રીં વૈષ્ણવી શિરસે સ્વાહા ।
ૐ ક્લીં અમૃતાનન્દે શિખાયૈ વૌષટ્ ।
ૐ શ્રીં દૈત્યમાલિની કવચાય હુમ્ ।
ૐ તં તેજઃપ્રકાશિની નેત્રદ્વયાય વૌષટ્ ।
ૐ હ્રીં ક્લીં શ્રીં બ્રાહ્મીં વૈષ્ણવીં ફટ્ ॥ અથ ધ્યાનમ્ ॥

બ્રાહ્મીં ચ વૈષ્ણવીં ભદ્રાં ષડ્ભુજાં ચ ચતુર્મુખામ્ ।
ત્રિનેત્રાં ચ ત્રિશૂલાં ચ પદ્મચક્રગદાધરામ્ ॥ ૧॥

પીતામ્બરધરાં દેવીં નાનાલઙ્કારભૂષિતામ્ ।
તેજઃપુઞ્જધરાં શ્રેષ્ઠાં ધ્યાયેદ્બાલકુમારિકામ્ ॥ ૨॥

ૐકારલક્ષ્મીરૂપેણ વિષ્ણોર્હૃદયમવ્યયમ્ ।
વિષ્ણુમાનન્દમધ્યસ્થં હ્રીંકારબીજરૂપિણી ॥ ૩॥

ૐ ક્લીં અમૃતાનન્દભદ્રે સદ્ય આનન્દદાયિની ।
ૐ શ્રીં દૈત્યભક્ષરદાં શક્તિમાલિની શત્રુમર્દિની ॥ ૪॥

તેજઃપ્રકાશિની દેવી વરદા શુભકારિણી ।
બ્રાહ્મી ચ વૈષ્ણવી ભદ્રા કાલિકા રક્તશામ્ભવી ॥ ૫॥

આકારબ્રહ્મરૂપેણ ૐકારં વિષ્ણુમવ્યયમ્ ।
સિદ્ધિલક્ષ્મિ પરાલક્ષ્મિ લક્ષ્યલક્ષ્મિ નમોઽસ્તુતે ॥ ૬॥

સૂર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસમપ્રભમ્ ।
તન્મધ્યે નિકરે સૂક્ષ્મં બ્રહ્મરૂપવ્યવસ્થિતમ્ ॥ ૭॥

ૐકારપરમાનન્દં ક્રિયતે સુખસમ્પદા ।
સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ॥ ૮॥

પ્રથમે ત્ર્યમ્બકા ગૌરી દ્વિતીયે વૈષ્ણવી તથા ।
તૃતીયે કમલા પ્રોક્તા ચતુર્થે સુરસુન્દરી ॥ ૯॥

પઞ્ચમે વિષ્ણુપત્ની ચ ષષ્ઠે ચ વૈષ્ણવી તથા ।
સપ્તમે ચ વરારોહા અષ્ટમે વરદાયિની ॥ ૧૦॥

નવમે ખડ્ગત્રિશૂલા દશમે દેવદેવતા ।
એકાદશે સિદ્ધિલક્ષ્મીર્દ્વાદશે લલિતાત્મિકા ॥ ૧૧॥

એતત્સ્તોત્રં પઠન્તસ્ત્વાં સ્તુવન્તિ ભુવિ માનવાઃ ।
સર્વોપદ્રવમુક્તાસ્તે નાત્ર કાર્યા વિચારણા ॥ ૧૨॥

એકમાસં દ્વિમાસં વા ત્રિમાસં ચ ચતુર્થકમ્ ।
પઞ્ચમાસં ચ ષણ્માસં ત્રિકાલં યઃ પઠેન્નરઃ ॥ ૧૩॥

બ્રાહ્મણાઃ ક્લેશતો દુઃખદરિદ્રા ભયપીડિતાઃ ।
જન્માન્તરસહસ્રેષુ મુચ્યન્તે સર્વક્લેશતઃ ॥ ૧૪॥

અલક્ષ્મીર્લભતે લક્ષ્મીમપુત્રઃ પુત્રમુત્તમમ્ ।
ધન્યં યશસ્યમાયુષ્યં વહ્નિચૌરભયેષુ ચ ॥ ૧૫॥

શાકિનીભૂતવેતાલસર્વવ્યાધિનિપાતકે ।
રાજદ્વારે મહાઘોરે સઙ્ગ્રામે રિપુસઙ્કટે ॥ ૧૬॥

સભાસ્થાને શ્મશાને ચ કારાગેહારિબન્ધને ।
અશેષભયસમ્પ્રાપ્તૌ સિદ્ધિલક્ષ્મીં જપેન્નરઃ ॥ ૧૭॥

ઈશ્વરેણ કૃતં સ્તોત્રં પ્રાણિનાં હિતકારણમ્ ।
સ્તુવન્તિ બ્રાહ્મણા નિત્યં દારિદ્ર્યં ન ચ વર્ધતે ॥ ૧૮॥

યા શ્રીઃ પદ્મવને કદમ્બશિખરે રાજગૃહે કુઞ્જરે
શ્વેતે ચાશ્વયુતે વૃષે ચ યુગલે યજ્ઞે ચ યૂપસ્થિતે ।
શઙ્ખે દેવકુલે નરેન્દ્રભવની ગઙ્ગાતટે ગોકુલે
સા શ્રીસ્તિષ્ઠતુ સર્વદા મમ ગૃહે ભૂયાત્સદા નિશ્ચલા ॥ ૧૯॥

॥ ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે ઈશ્વરવિષ્ણુસંવાદે દારિદ્ર્યનાશનં
સિદ્ધિલક્ષ્મીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*Siddhi Lakshmi Stotram*

pdf was typeset on January 15, 2024

Please send corrections to *sanskrit@cheerful.com*